## MAMIRA - मंमीर

ममीरा तिक्तमूला स्यात् कामरुपसमुद्भवा । स्निग्धखण्डितपत्रा च सितपुष्पाऽतितिक्तका ।

तिक्तमूला कटुस्तिक्ता रूक्षोष्णा दीपनी सरा । चक्षुष्या पाचनी रुच्या कफपित्तहरा मता ॥

यकृदुत्तेजनी चैव विषमज्वरनाशिनी । नेत्रामये यकृद्रोगे कुष्ठे शोथे कफामये ॥

कासे श्वासे तथा मूत्रकृच्छ्रे मेहे च पूयजे । ज्वरौत्तरिकदौर्बल्ये ज्वरे चापि प्रशस्यते ॥ **(स्व)**

**(Ref:PV sharma ; dravyaguna vijnan;part2)**